अथश्रीललिताहृदयंत्रैलोक्यमोहनकवचप्रारंभः॥२

श्रीः

श्रीगणेशायनमः॥ ललिताहृदयं॥ स्फुरत्स्फटिकसंकाशं द्विनेत्रंकरु
१ णानिधिं॥ वराभयकरंवंदे श्रीगुरुंशिवरूपिणं॥ [illegible]ज्ञाननमो [illegible]
भानुमूर्ध्वपंकजसंस्थितं॥ सदाशिवमयंनित्यंश्रीगुरुंप्रणमाम्य
हं॥ श्रीविद्यांजगतांधात्रीं[illegible]र्गस्थितिलयेश्वरीं॥ नमामिल
लितांनित्यांभक्तानांमीष्टदायिनीं॥ बिंदुत्रिकोणसंयुक्तंव
सुकोणसमन्वितं॥ दशकोणद्वयोपेतंमनुकोणसमन्वितं॥ १
दलाष्टकसमोपेतंदलषोडशकान्वितं॥ वृत्तत्रयान्वितंभूमि
सदनत्रयभूषितं॥ नमामिललितांचक्रंभक्तनामेतदिष्टदं॥
अमृतांभोनिधिंतत्ररत्नद्वीपंनमाम्यहं॥ नानावृक्षमहोद्या

सहस्रस्तंभमंडपं॥ [illegible]लितेतवदेवेभ्रामडाम्यमृतवाटिकां॥
आनंदवाटिकांवंदे॥+

नवंदेहंकल्पवाटिकां॥ संतानवाटिकांवंदे हरिचंदनवाटिकां॥
नमामितवदेवेशि कदंबवनवाटिकां॥ मंदारवाटिकांवंदे पारिजा
तस्यवाटिकां॥ पुष्यरागमहारत्नप्राकारंप्रणमाम्यहं॥ पद्मरागम
णिभिःप्राकारंसर्वदाभजे॥ गोमेदरत्नप्राकारंवज्रप्राकारमाश्र
ये॥ वैडुर्यरत्नप्राकारंप्रणमामितवेश्वरी॥ इंद्रनीलाख्यरत्नानां
प्राकारंप्रणमाम्यहं॥ मुक्तारत्नमयंदिव्यंप्राकारंतेनमाम्यहं॥
मरकतारमहारत्नप्राकारायनमस्तव॥ विद्रुमाख्यमहारत्नप्रा
कारंतत्रमाश्रये॥ माणिक्यमंटपंचैवं विमर्शवाटिकांभजे॥
भजेबालातपोद्गारंचंद्रकोद्गारमाश्रये॥ महाशृंगारपरिखां

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

ल-हृ-
२

महापद्माटवी मध्ये ॥ चिंतामणि महारत्ने गृहराजे नमाम्यहं ॥
पूर्वाम्नायमयं पूर्वं द्वारं देवी नमाम्यहं ॥ दक्षिणाम्नायरूपं तु
दक्षिणद्वारमाश्रये ॥ नमामि पश्चिमद्वारं पश्चिमाम्नायरूप
कं ॥ वंदेहमुत्तरद्वारमुत्तराम्नायरूपकं ॥ वंदेहमनोसहमं ऊर्ध्वा
म्नायमहं वंदे ऊर्ध्वद्वारं कुलेश्वरी ॥ ललितातव देवेशि मह
सिंहासने मध्ये ॥ ब्रह्मात्मकं मंचपादं एकं तव नमाम्यहं ॥ एकं २
विष्णुमयं पादं पादे तव नमाम्यहं ॥ एकं रुद्रमयं पादं नौमि मं
चे तृतीयकं ॥ २० ॥ अंत्य पादं नमाम्येकं तत्रेदेवीश्वरात्मकं ॥ पं
चैकफलकं वंदे सदाशिवमयं शुभं ॥ नमामि ते हंसतूलतलिकां

परमेश्वरी ॥ नमामि ते हंसतूलमहोपधानमुत्तमं ॥ कौसुंभास्तरणं
वंदे तव नित्यं नमाम्यहं ॥ महावितानकं वंदे महाजवनिकां मडे ॥
एवं पूजागृहं वंदे श्रीचक्रस्थां शिवां प्रिये ॥ मद्दक्षिणेस्थापयामि भागेषु अ
भितो दिकं ॥ अभीतस्त्वा महादेवी दीपान्संस्थापयाम्यहं ॥ मू
लेनात्रिपुराचक्रं तव संपूजयाम्यहं ॥ त्रिभिः खंडैः स्तवस्त्वे पूजे
यामि महेश्वरी ॥ वाय्वाग्नि जलसंयुक्तं प्राणायामैरहं शिवे ॥
शोषयामि दहनं देवी करोमि प्लावनं तथा ॥ त्रिवार मूलमंत्रेण पा
ए णयामान्करोम्यहं ॥ ॥ अपसर्पंतु ये भूता ये भूता भूमिसंस्थिता ॥
ये भूता विघ्नकर्तारस्ते नश्यंतु शिवाज्ञया ॥ करोम्यनेन मंत्रेण

३ तालत्रयमयं शिवे ॥ नारायणोहं ब्रह्माहं रुद्रोहं मैशोवास्म्यहं ॥ देव
देहं परमात्माहं महात्रिपुरसुंदरी ॥ ध्यात्वा वैवह्निवर्चं न्यासं तत्त्वक
रोम्यहं ॥ कुमारी बीजसंयुक्ते महात्रिपुरसुंदरी ॥ ३० ॥ मातृकाक्षरक्षेति
हृदि करोम्यंजलिमीश्वरी ॥ नमो देव्यासनायेति मेरुकं रोम्यार
सने शिवे ॥ चक्रासनेर नमस्यामि सर्वमंत्रासने भजे ॥ साध्यसि
द्धासनं वंदे मंत्रे रत्नि महेश्वरी ॥ करोम्यंमिन्य क्रमध्ये देवता ३
सनमः नमे ॥ करोम्यथ षडंगाख्यं मातृकां च करोम्यहं ॥ महाषोढा
ततः कुर्वे नवयोन्याख्यमन्नमे ॥ चक्रन्यासं ततः कुर्वे श्रीकंठन्या
समन्नमे ॥ केशवादिमहान्यासं क्रमन्यासं करोम्यहं ॥ पीठन्यासं

कुर्वे शांभवं शिवपः शक्तिः गुरुभोगस्तथैव च ॥ योगिनीमीनकं चैव बलिपात्रकं
ततः कुर्वे कुर्वे कामकलाकृये ॥ ततः करोमि स्थित्यादिन्यासं ते त्रिपुरेश्वरी ॥
ततः कृष्टो दग्धेनाहं कामयोगमहेश्वरी ॥ करोमि मंडलं रत्नं चतुरस्त्रं
शिवप्रिये ॥ पुष्पैरभ्यर्च्य साधारं शांखं संस्थापयाम्यहं ॥ अर्चयामि
षडंगेन जलमापूरयाम्यहं ॥ ददामि चादिमो बिंदु कुर्वे मूलाभिमं
त्रितं ॥ तज्जलेन जगन्मातः त्रिकोणं रत्नसंयुतं ॥ षट्कोणं चतुरस्रं
च मंडलं प्रकरोम्यहं ॥ विषयापूजनं नम ध्येरवं दैत्यस्थामि पूज
नं ॥ नीजायन्त्याच षट्कोणं पूजयामि शिवप्रिये ॥ तस्मिन्नशावू
लम्मानं संप्त मंडलमाश्रमे ॥ ४० ॥ धूम्रार्चिषं नमस्यामि रुष्मां तो ज्व
लिनं भजे ॥ ज्वालीनीं च नमस्यामि वंदेहं विस्फुलिंगिनी ॥ सुश्रि
यं च स्वरूपां च कपिलां प्रणमाम्यहं ॥ नौमि हव्यवहां नित्यं भजे कव्य

वहां कलां ॥ सूर्यस्य मंडले तत्र कला द्वादशसंयुतं ॥ अर्च्ये चाहमहं
४ वंदे तपिनीं तापिनीं भजे ॥ धूम्रां मरीचिं वंदेहं ज्वालिनीं च रुचिं भ
जे ॥ सुषुम्नां भोगदां वंदे भजे विश्वां च बोधिनीं ॥ धारिणीं च क्ष
मां वंदे सोररताः कलां भजे ॥ ॥ सोमस्य मंडले तत्र कला षोडशकां
म्बकं ॥ अर्च्यामृतां मवकं वंदे अमृतां मानदां स्तवे ॥ पूषां पुष्टिं भजे तु
ष्टिं रतीं धृतिमहं भजे ॥ शशिनीं चंद्रिकां वंदे कांतिं ज्योत्स्नां श्रियं ४
भजे ॥ नौमि प्रीतिं चांगदां च पूर्णां पूर्णामृतां भजे ॥ त्रिकोणं लेख
नं कुर्वे अकारादिस्वरात्मकं ॥ हलक्षवर्णसंयुक्तं स्थितं तं हंसि
मां स्वरः ॥ वाक्कामशक्तिसंयुक्तं हंसं नासापयाम्यहं ॥ वन्नाद्रुहिष
उस्रस्पले स्वनेत्र करोम्यहं ॥ एवं भागादिषट्कोणं षडंगेनार्चयाम्यहं ॥

श्रीविद्ययासप्तवारं करोम्यत्राभिमंत्रणं ॥ ५० ॥ समर्पयामि विश्वेशि
तस्मिन्नांध्याक्षताहिकं ॥ ध्यायामि पूजाद्रव्यं तेन सर्वं वियामयं शुभं ॥
चतुर्नवतिसन्मंत्रान्स्पृष्ट्वा तत्प्रजपाम्यहं ॥ वन्हेर्दश कलाः सूर्य कला
द्वादशकं भजे ॥ आश्रये षोडशकलाः तत्तत्सोमस्य केतुरंगाः सृष्टिं
ऋद्धिं स्मृतिं वंदे मेधां कांतिं तथैव च ॥ लक्ष्मीं धृतिं स्थिरां चैव स्थि
तिं सिद्धिं भजाम्यहं ॥ एताः ब्रह्मकला वंदे जरां तां पालिनीं भजे ॥ शांतिं न
मामीश्वरीं च रतिं वंदे च कामिकां ॥ वरदां ह्लादिनीं वंदे प्रीतिं दीर्घां भ
जाम्यहं ॥ एताः विष्णुकला वंदे तीक्ष्णां रौद्रीं भयां भजे ॥ निद्रां तंद्रां क्षु
धां वंदे नमामि क्रोधिनीं क्रियां ॥ उत्कारीं च भजे मृत्युमेताः रुद्रक
लां भजे ॥ पीतां श्वेतां भजे नित्यं अरुणां असितां भजे ॥ ईश्वरस्य

कलायताः वंदे नियमगौपादः॥ निवृत्तिं च प्रतिष्ठां च विद्यां शांति
नमाम्यहं॥ इंधिकां दीपिकां वंदे रेचिकां मोचिकां भजे॥ परां सूक्ष्मां सू-
५ क्ष्मां च प्रणमामि तवेश्वरी॥ अनाख्यां प्रणमस्यामि नोमि ज्ञानामृतां
कलां॥ आप्यायनीं व्यापिनीं च व्योमिनीं प्रणमाम्यहं॥ ६०॥ कलास-
दाशिवस्यता षोडश प्रणमाम्यहं॥ हंसाख्यं च महामंत्रं ज्योतिषं हं
समाश्रये॥ त्रियंबकं नमस्यामि तद्विष्णुं प्रणमाम्यहं॥ विष्णुयोनिं
मूलविद्यां नमाम्यामि मेनुनमेः॥ अमृतं मंत्रितं वंदे चतुर्नवति ५
मिस्तवा॥ अखंडैकरसानंदे चतुर्नवतिमिस्तका करे परसुधात्म-
नी॥ स्वच्छंदस्फुरणामात्र निधेह्यकुलरूपिणी॥ अकुलस्थामृता-
कारे सिद्धज्ञानकरे परे॥ अमृतत्वं निधेह्यस्मिन्वस्तुनि क्लिन्नरूपिणी॥

वा
स्वरूपिण्ये करस्य हंवस्तुवाथ्येत स्वरूपिणी॥ ओँ कुलामृताकारे
मयि चिस्फुरणं कुरु॥ अमृतैते मानमस्यामि श्रीविद्यां प्रणमाम्यहं॥
एनि मेनुजमे वैरिमंत्रितं परमामृतं॥ ज्योतिर्मयमिदं कुर्वे परमार्थ्यं
तवेश्वरी॥ तद्विंदुर्निर्मितो शिरसि गुरुं संतर्पयाम्यहं॥ ब्रह्माहमस्मि
तद्विंदुं कुंडलीन्यां जुहोम्यहं॥ हृच्चक्रस्थां महादेवीं महात्रिपुरसुं-
दरीं॥ निरस्ततमो हतिमिरं साक्षात्संवित्स्वरूपिणीं॥ नासापु-
टे चंद्रकलां अधो निर्गमयाम्यहं॥ समानयामि मध्यस्थं त्रिखंडं
कुसुमांजलीं॥ जगन्मातुर्महादेवी महात्रिपुरसुंदरी॥ ७०॥ सुधाचैत-
न्यमुर्त्तिं [illegible]कल्पयामि नमः शिवे॥ [illegible]नेन मनुनादेवीं यंत्रे संस्थापयाम्यहं॥
सौ

महापद्मवनांतस्थे कारणानंदविग्रहे ॥ सर्वभूतहिते मातरेह्योहि प
६ रमेश्वरी ॥ देवेशि भक्तिसुलभे सर्वावरणसंयुते ॥ यावत्त्वां पूजयि
ष्यामि तावत्त्वं सुस्थिरा भव ॥ अनेन मंत्रयुग्मेन त्वामत्रावाहयाम्य
हं ॥ अकल्पयामि नमः पाद्यं अर्घ्यंत कल्पयाम्यहं ॥ सुगंधतैलाभ्यंगम
तमज्जनशाला प्रवेशनं ॥ कल्पयामि नमः स्तस्मिन्मणिपीठप्रवे
शनं ॥ दिव्यस्नानीयमीशानि गृहाणोद्धर्तनं शुभे ॥ गृहाणोष्णोद ६
कस्नानं कल्पयामि महेश्वरी ॥ हेमकुंभाच्युतै [illegible] सिद्धं कल्पया
म्यभिषेचनं ॥ कल्पयामि नमस्तुभ्यं धौतेन परिमार्जनं ॥ बालभा
नुप्रतीकाशं दुकूलं परिधापनं ॥ अरुणेन दुकूलेनोत्तरीयं कल्पयामि ते

प्रवेशनं कल्पयामि तवालेपनमर्पये ॥ नमस्ते कल्पयाम्यंबा मणिपीठो
पवेशनं ॥ अष्टगंधैः कल्पयामि सर्वांगेषु विलेपनं ॥ कालागरुमहा
धूपं तव केशेषु नवप्रिये ॥ मल्लिकामालतीजातीचंपकादि मनोरमैः ॥
रचितां कुंकुमे मालां कल्पयामि नमस्तव ॥ प्रवेशनं कल्पयामि न
मो भूषणमंटपं ॥ उपविश्य रत्नपीठे तत्र ते कल्पयाम्यें [illegible] ॥ हं
नवमाणिक्यमकुटं ततश्चंद्रशकलं तव ॥ ततः श्रीमंतसिंदूरं ततस्ति
लकमुत्तमं ॥ कालांजनं कल्पयामि पत्रीयुगलमुत्तमं ॥ मणिकुंडलयुग्मं
ते नासाभरणमीश्वरी ॥ ते कल्पयामि त्रिपुरे ललिते पक्षयावकं ॥ अ
नाभूषणं कंठे हेमचिंताकमुत्तमं ॥ कल्पयामि नमो मुक्तावलिं
य पदकं ते कल्पयामि महापदकमुत्तमं

ऽर्चात्रे शिवप्रिये ॥ धम्यवारं च केयूरयुगलानां चतुष्टयं ॥ वलयाव
७ लिमीशानि ऊर्मिकावलिमीश्वरी ॥ कांचीदाम कटीसूत्रं सौभाग्याभ
रणं च ते ॥ त्रिपुरे पादकटकं कल्पये रत्ननूपुरं ॥ पादांगुलीयकं
तुभ्यं पाशमेकं करे तव ॥ अन्यस्मिन्नंकुशं देवी पुंड्रेक्षुधनुषं परे ॥
अपरे पुष्पबाणाञ्छ्रीमन्माणिक्यपादुके ॥ तदावरणदेवेशि
महाचक्राधिरोहणं ॥ कामेश्वरांकपर्यंकउपवेशनमुत्तमं ॥ सुधा ७
सवासवचषकं तत आचमनीयकं ॥ कर्पूरवीटिकां तुभ्यं कल्पयामि न
मः शिवे ॥ आनंदोल्लाससंल्लासहसंतं कल्पयाम्यहं ॥ मंगलारात्रि
कं वंदे छत्रं ते कल्पयाम्यहं ॥ ततः चामरयुग्मं ते दर्पणं कल्पयाम्यहं ॥

तालवृंतं कल्पयामि गंधपुष्पमपीश्वरि ॥ धूपदीपं च नैवेद्यं कल्पयामि
नमस्तव ॥ अथाहं बैंदवे चक्रे सर्वानंदमयात्मके ॥ रत्नसिंहासने रम्ये
समासीनां शिवप्रियां ॥ उद्यद्भानुसहस्राभां जपापुष्पसमप्रभां ॥ नवर
त्नप्रभायुक्तमकुटेन विराजितां ॥ चंद्ररेखासमोपेतां कस्तूरीतिलकां
कितां ॥ कामकोदंडसौंदर्यनिर्जितभ्रूलतायुतां ॥ अंजनांचितने
त्रां च पद्मपत्रनिभेक्षणां ॥ मणिकुंडलसंयुक्तकर्णद्वयविराजि
तां ॥ तांबूलपूरितमुखीं सुस्मितास्यविराजितां ॥ आद्यभूषणसंयु
क्तां हेमचिंताकसंयुतां ॥ पदकेन समोपेतां महापदकसंयुतां ॥ मुक्ता
वलिसमोपेतां एकावलिसमन्वितां ॥१००॥ केयूरांगदसंयुक्तां चतुर्भ
बाहुविराजितां ॥ अष्टगंधसमोपेतां श्रीचंदनविलेपनां ॥ हेमकुंभस

मप्ररव्यांस्तनद्वयविराजितो॥रक्तवस्त्रपरीधानो रक्तकंचुकसंयुतो॥स्व
स्मरो मावलियुतो तन्मध्ये विराजितो॥पीतवस्त्रपरीधानो पीतकं
८ चुकसंयुतो मन्त्रमाणिक्यरवचितो कांचियुतनितंबिनी॥सरीरा
वां कस्य पृथु महाजघनमंडलो॥कदलीस्तंभसंकाशं उरुयुग्मविरा
जितो॥कपालि कांतिसंकाशं जंघायुगलसेवितो॥गुल्फद्वया
पेतो रक्तपादद्वयान्वितो॥ब्रह्माविष्णुमहादेव शिरोमुकुटजानया॥
कांस्याधिराजितपरां पंचभक्तत्राणपरायणां॥इक्षुचापं च पुष्पेषु पाशां
कुशाधरां परां॥संवित्स्वरूपिणीं देवीं जपामि परमेश्वरीं॥प्रर
शो याम्यथ शिवेन वक्तुं न वरप्रदाः॥वांतपे यामि त्रिपुरे त्रिधा
मूलेन पावेतो॥आग्नेयामीशदिग्भागे नैरृत्यां मारुते तथा॥

मध्ये दिक्षु षडंगानि क्रमादभ्यर्चयाम्यहं॥आद्यां कामेश्वरीं वंदे
नमामि भगमालिनीं॥नित्यक्लिन्नां नमस्यामि भेरुंडां प्रणमाम्य
हं॥वह्निवासां नमस्यामि महाविद्येश्वरीं भजे॥शिवदूतिं नमस्या
मि त्वरितां कुलसुंदरीं॥नित्यां नीलपताकां च विजयां सर्वमंगलां॥
ज्वालामालां च चित्रां च महानित्यां च संस्तुवे॥दिव्यौघोहं नमस्या
मि परेशां परमेश्वरीं॥मित्रेशमयिषु[illegible]शं उड्डीशं प्रणमाम्यहं॥
चर्यानाथं नमस्यामि लोपामुद्रामहं भजे॥अगस्त्यं प्रणमस्यामि
सिद्धौघं कालतापनं॥धर्माचार्यं नमस्यामि मुक्तकेशीश्वरं भजे॥
भजे दीपकलानाथं मानवौघं ततः परं॥विष्णुदेवं नमस्यामि प्रभा
करं महं भजे॥तेजोदेवं नमस्यामि मनोजमथ संस्तुते॥कल्याणदे

कलेयरत्नदेवं भजाम्यहं ॥ वासुदेवं नमस्यामि श्रीरामानंदमाश्रये ॥ पर
मेष्ठिं गुरुं वंदे परमं गुरुमाश्रये ॥ श्रीगुरुं प्रणमस्यामि मूर्ध्नि ब्रह्मबि
लेस्थितं ॥ कबिलेहं नमस्यामि श्रीगुरोः पादुकां ततः ॥ आद्यप्रथमा
प्यमरेखायां चतुरश्र तलेश्वरी ॥ अणिमां लघिमां वंदे महिमां प्र
णमाम्यहं ॥ २० ॥ ईशित्वसिद्धिं कलये वशितां प्रणमाम्यहं ॥ प्राकाम्य
सिद्धिं वंदेहं मिच्छाप्राप्तिं महं भजे ॥ सर्वकामप्रदां सर्वकामसिद्धि
महं भजे ॥ मध्यमे चतुरस्रेहं ब्राह्मीं माहेश्वरीं भजे ॥ कौमारीं वि
ष्णवीं वंदे वाराहीं प्रणमाम्यहं ॥ माहेंद्रीमपि चामुंडां महालक्ष्मीं महं भजे ॥
तृतीये चतुरस्रे तु सर्वसंक्षोभिणीं भजे ॥ सर्वविद्राविणीं मुद्रां सर्वा
कर्षिणीं भजे ॥ सर्ववशंकरीं वंदे सर्वोन्मादिनिकां भजे ॥

भजे महांकुशां मुद्रां खेचरीं प्रणमाम्यहं ॥ बीजमुद्रां योनिमुद्रां म
ड सर्वत्रिखंडिनीं ॥ त्रैलोक्यमोहनं चक्रं नमामि ललितं तव ॥ न
रवं मामि योगिनीं तत्र प्रकट्याख्यां अभीष्टदं ॥ रूपाणि शासनं वंदे त
त्र त परमेश्वरी ॥ चक्रेश्वरीं तत्र वंदे त्रिपुरां परमेश्वरीं ॥ सर्वसंक्षो
भिणीं मुद्रां ततोहं कलये शिवे ॥ अथाहं षोडशारके कामाकर्ष
णिकां भजे ॥ बुध्याकर्षिणिकां वंदे स्पर्शाकर्षिणिकां भजे ॥ रूपाक
र्षिणीं त्वां वंदे चित्ताकर्षिणिकां भजे ॥ ३० ॥ धैर्याकर्षिणिकां वंदे
स्मृत्याकर्षिणीकां भजे ॥ नामाकर्षिणिकां वंदे बीजाकर्षिणि
कां भजे ॥ शरीराकर्षिणीं वंदे सर्वदा परमेश्वरी ॥ सर्वाशापरवं
हं कराकर्षिणीं भजे ॥ शब्दाकर्षिणिकां वंदे

चक्रकूलयेहं नवेश्वरी ॥ गुप्ताख्यां योगिनीं वंदे तत्राहं गुप्तपूजितां ॥
१० पातांबुजासनेतत्र नमामि ललितेतव ॥ त्रिपुरेशि नमस्यामि मन
ज्ञाभिष्टार्थदायिनीं ॥ सर्वविद्राविणीं मुद्रां तत्राहं ते विचिंतये ॥
त्रिवेतवाष्टपत्रेहं मनंगकुसुमां भजे ॥ अनंगमेखलां वंदे अ
नंगमदनां भजे ॥ ततोहं प्रणमस्यामि अनंगमदनातुरां ॥ अ
नंगमेखलांकूलये भजे चानंगवेगिनीं ॥ अनंगमंकुशां वं १०
दे अनंगमालिनीं भजे ॥ तत्राहं प्रणमस्यामि दव्यात्मासुन
मूजनं ॥ नमामि जगदीशानीं तत्र त्रिपुरसुंदरीं ॥ सर्वाकर्षिणी
कांमुद्रां तत्राहं कूलयाम्यहं ते ॥ भुवनारे तव शिवे सर्वसंक्षोभिणीं
स्तुवे ॥ सर्वविद्राविणीं वंदे सर्वाकर्षिणीं भजे ॥ सर्वाल्हादिनीं
सर्वसंक्षोभणचक्रयोगिनीपूजनामिए

वंदे सर्वसंमोहिनीं भजे ॥ सर्वस्तंभिनीं वंदे कूलये सर्वरंजनीं ॥ ४० ॥ व
शंकरीं नमस्यामि सर्वजृंभिणिकां भजे ॥ सर्वोन्मादिनीं वंदे भजे
सर्वार्थसाधकीं ॥ संपत्तिपूरिणीं वंदे सर्वमंत्रमयीं भजे ॥ भजाम्यहं त
तः शक्तिं सर्वद्वंद्वक्षयंकरीं ॥ तत्राहं कूलयेचक्रे सर्वसौभाग्यदायके ॥
नमामि जगतां धात्रीं संप्रदायस्वरूपिणीं ॥ नमामि परमेशानीं महा
त्रिपुरवासिनीं ॥ कूलयेहं तव शिवे महासर्ववशंकरीं ॥ बहिर्दशारे ते देवी
सर्वसिद्धिप्रदां भजे ॥ सर्वसंपत्प्रदां वंदे सर्वप्रियंकरीं भजे ॥ नमा
म्यहं ततो देवी सर्वमंगलकारिणीं ॥ सर्वकामप्रदां वंदे सर्वदुःखविमो
चनीं ॥ सर्वमृत्युप्रशमनीं सर्वविघ्ननिवारिणीं ॥ सर्वांगसुंदरीं वं
दे सर्वसौभाग्यदायिनीं ॥ सर्वार्थसाधकं चक्रे तत्राहं ते विचिंतये ॥

११

तत्राहं प्रणमस्यामि कुलोत्तीर्णां च योगिनीं ॥ सर्वमंत्रासनं वंदे त्रिपुरे
श्रीयमाश्रये ॥ कलयामि ततो मुद्रां सर्वोन्मादनकारिणीं ॥ अंतर्दशा
रे तद्देवीः सर्वज्ञां प्रणमाम्यहं ॥ सर्वशक्तिं नमस्यामि सर्वैश्वर्यप्रदां भ
जे ॥ ५० ॥ सर्वज्ञा नमयं वंदे सर्वव्याधिविनाशिनीं ॥ सर्वाधारस्वरू
पां च सर्वपापहरां भजे ॥ सर्वानंदमयीं वंदे सर्वरक्षास्वरूपिणीं ॥
प्रणमामि महादेवीं सर्वेप्सितफलप्रदां ॥ सर्वरक्षाकरं चक्रं नमाम
कुलयेसरा ॥ निगर्भयोगिनीं वंदे तत्राहं परमेश्वरीं ॥ साध्यसिद्धा
सनं वंदे भजे त्रिपुरमालिनीं ॥ कलयामि ततो देवीं मुद्रां सर्वमहां
कुशां ॥ अष्टारे वशिनीं वंदे महाकामेश्वरीं भजे ॥ मोहिनीं विम
लां वंदे अरुणां जयिनीं भजे ॥ सर्वेश्वरीं नमस्यामि कौलिनीं प्र

BHAU DAJI

नमामि योगिनीं तत्र रहस्याख्य नमीश्वरं ॥

णमाम्यहं ॥ सर्वरोगहरं चक्रं तत्राहं कलये शिवे ॥ भजामि त्रिपुरां
सिद्धां भजे मुद्राचखेचरीं ॥ महात्रिकोणस्य बाह्ये चतुर्दिक्षु ततो
श्वरी ॥ नमामि जृंभनं बाणं चापं संमोहनं भजे ॥ पराद्ये अंकुशं वं
दे भजेऽस्त्रं भनमंकुशं ॥ त्रिकोणेऽहं जगद्धात्रीं महाकामेश्वरीं भजे ॥
महावज्रेश्वरीं वंदे महाश्रीभगमालिनीं ॥ महाश्रीसुंदरीं वंदे ॥
सर्वकामफलप्रदं ॥ सर्वसिद्धिप्रदं चक्रं तत्र देवीं नमाम्यहं ॥ ६० ॥ न
माम्यतिरहस्याख्यां योगिनीं तत्र कामदां ॥ त्रिपुरांबां नमस्यामि बी
जमुद्रां महं भजे ॥ मूलमंत्रेण ललितां बिंदौ प्रजयाम्यहं ॥ सर्वानं
दमयं चक्रं तत्र देवीं भजाम्यहं ॥ परापररहस्याख्यां योगिनीं तत्र
माश्रये ॥ महाचक्रेश्वरीं वंदे योनिमुद्रां महं भजे ॥ धूपदीपादिकैः स

वेमर्पितं कल्पयाम्यहं॥ लक्ष्मीतये महासूत्रं दर्शयामि ततः शिवे॥
१२ शाल्यान्नं मधुसंयुक्तं पायसापूपसंयुतं॥ घृतसूपसमायुक्तं स
र्वभक्ष्यसमन्वितं॥ दधीक्षीरसमायुक्तं बहुशाकसमन्वितं॥ नि
क्षिप्य कांचने पात्रे नैवेद्यं कल्पयामि ते॥ संकल्प्य बिंदुनावक्त्रे
कुचौ बिंदुद्वयेन च॥ योनिं च सपरार्द्धेन कृत्वा श्रीत्रिपुरं तव॥ ए
तत्कामकलारूपं नैवेद्यानां सर्वकामदं॥ सर्वसौभाग्यदं वंदे तव १२
त्रिपुरसुंदरी॥ वामभागे महेशानि वृत्तं च चतुरश्रकं॥ कृत्वा गंधा
क्षताद्यैश्च अर्चयामि महेश्वरी॥ वा॰ मवाद्यं नमस्यामि तत्र
व्यापकमंडले॥ जलयुक्तमन्नयुक्तं मकारत्रयमोदनं॥ तत्र
विन्यस्य दास्यामि भूतेभ्यो बलिमुत्तमं॥ नमस्ते देवदेवेशि

नमस्ते लोकवंदिते॥ नमः शिवपरांकस्थे नमस्त्रिपुरसुंदरी॥ प्रद
क्षिणं नमस्कारं मनेनाहं करोम्यहं॥ सौं ततः सकलमंत्राणां साक्षा
त्त्वं परमेश्वरी॥ प्रजपामि महाविद्यां लक्ष्मीसार्थ महं सदा॥ तत्र वि
द्यां प्रजप्तां सत्तोभि त्वं परमेश्वरी॥ महादेवी महेशानी महाशिवम
नप्रिये॥ महानिसे मेहा सिद्धिस्त्वां महेशरणं गतेस्मि॥ ह्रौं त्वं त्रि ये
पुरदेवी ललिते जगदीश्वरी॥ सदाशिवप्रियंकरी पाहिमां वरु
णनिधे जगन्मातुर्जगद्रूपे जगदीश्वरवल्लभे॥ जगन्मये जग
त्क्षे गौरी त्वां महं माश्रये॥ अनाद्ये सर्वविद्यानां आद्यशक्ति
प्रदायिनी॥ गिरिराजस्य तनये नमस्ते त्रिपुरेश्वरी॥ जयादेवेदे

त्रिब्रह्ममातृ महेश्वरी ॥ विष्णुमातुर नायं ते हरमातुः सुरेश्वरी ॥
१२ ब्रह्मादिसुरसंस्तुत्ये लोकत्रयपवित्रीकृसि ॥ सर्वसंपत्प्रदे नित्ये सौम
हेवलये सदा ॥ चिदानंदे निराधारे चिद्रूपिणि शिवप्रिये ॥ ८० ॥
अणिमादिगुणाधारे त्वामेवाकुलयाम्यहं ॥ ब्रह्मादिमातृसंस्तु
त्ये सर्वावरणसंयुते ॥ ज्योतिर्मयमहारूपे पाहिमां त्रिपुरे सदा ॥
लक्ष्मीवाण्यादिसंपूज्ये ब्रह्मविष्णुशिवप्रिये ॥ मज्जामितवपा
शांकं देवी त्रिपुरसुंदरी ॥ त्वत्प्रीत्यर्थं ततः कूचि मन्त्यासंपूजयाम्य १३
हं ॥ अपंचकेनतो शक्तिं तर्पयामि महेश्वरी ॥ त्वयापीतं तु तत्शेषं
चिदग्नौ प्रजुहोम्यहं ॥ त्वत्प्रीत्यर्थं महादेवी ममाभीष्टार्थदायिनी ॥

बध्वा खेचरीमुद्रां क्षमस्व द्विसयाम्यहं ॥ तिष्ठ मे हृदये नित्यं त्रिपु
घ रे परमेश्वरी ॥ जगदंबे महाप्राज्ञे महाशक्ति शिवप्रिये ॥ हृदग्रे स्थिरे नि
त्यं महात्रिपुरसुंदरी ॥ ॥ एतत्त्रिपुरसुंदर्या हृदयं सर्वकामदं ॥ महारहस्यं
सततं दुर्लभं देवतैरपि ॥ साक्षात्परशिवेनोक्तं गुह्या[illegible]। दुर्लभम
नुत्तमं ॥ यः पठेन्नित्यमेकाग्रः श्रद्धया सुसमाहितः ॥ नित्यपूजाफ
लं देव्याः सपूर्णं नात्र संशयः ॥ पापैः स मुच्यते सद्यः कायवाक्चित्त
संभवैः ॥ सर्वजन्मसमुद्भूतैर्ज्ञानाज्ञानकृतैरपि ॥ १०० ॥ सर्वक्रतुषु
यत्पुण्यं सर्वतीर्थेषु यत्फलं ॥ तत्पुण्यं लभते नित्यं मानवो नात्र सं
शयः ॥ अचलां लभते लक्ष्मीं त्रैलोक्येनापि दुर्लभं ॥ साक्षाद्रुद्रमहा

लक्ष्म्या शीघ्रमेनन्न बसेसदा॥ अष्टैश्वर्यमवाप्नोति स शीघ्रं मानवोत्त
१४ मः॥ घूटिकापादुकासिध्याद्यष्ट वै शीघ्रमश्नुते॥ शंखाद्या नि
धयो द्वास्थां तं नित्यं पर्युपासते॥ वश्याद्यन्यानि कर्माणि शीघ्रं सि
ध्यंति तस्य हि॥ लोकस्य योषिताः सर्वाः पातालस्थां गनातथा॥ स्व
र्गलोकस्थितांसर्वाः याश्चान्या रूपगर्विताः॥ रमंति तेन सततं शीघ्रं व १४
श्यं न संशयः॥ राजाद्याः सकलोमर्त्याः हरिहर्यादयस्सुराः॥ अनंता
द्यामहानागा सिद्धयो गीश्वराद्यः॥ ऋषयो मुनयो यक्षाः स्तं वा नि
त्यं पर्युपासते॥ महती कीर्तिमाप्नोति शिवविष्णुसमप्रभो॥ परमायो
गमासाद्य खेचरो जायते सदा॥ अपमृत्युविनिर्मुक्ता कालमृत्युविवर्जितः॥

परमायुष्यमाप्नोति हरिहराद्युदुर्लभं॥ अ[illegible]तानि यत्रास्थाणि यथा चेष्ट
विधिवत्सदा॥ मूकोपि सर्वं द्यावान्दक्षिणामूर्तिवद्भवेत्॥ २००॥ ग्रहभू
तपिशाचाद्याः यक्षाश्चैव राक्षसाः॥ एतस्य श्रवणाद्देवी किंनरूपतिह
न्तःक्षणात्॥ तद्धस्तं प्राप्य सकलं विषं सद्यो विनश्यति॥ सहस्रावर्तयेसं
कारांकांस्तायं सर्वयात्रवत्॥ तस्माच्चेतत्परं स्तोत्रं त्रिपुराहृदयं शुभं॥
आपत्स्यो मुच्येत सद्यो भद्रो दिव्यस्वरूपधृक्॥ सांतते त्रिपुरसंदर्पोनि
सपूजापुलं लभेत्स॥ विमुक्तो रोगसंघातैः आरोग्यमहमश्नुते॥ प्रा
प्नोति महदैश्वर्यं सर्वविद्यानिधिर्भवेत्॥ तत्करस्पर्शमात्रायमृतोपि
सुखवस्वेत्॥ मुच्यते सर्वैर्विघ्नैः सन्नित्यं मानवोत्तमः॥ स भुंक्ते सर्व
लै

यान्

ला न्नरोगा न्नदुर्लभा अस्मिन्नेहिने॥ लभेत्पुत्रां पौत्रां महालक्ष्मीस
१५ मन्विताः॥ परमायुष्यसंयुक्तः साक्षाच्छिव मां भुवि॥ सृष्टिपाल
नसंहारकर्त्तावाप्यः स्वयं भवेत्॥ यः स्तुतं स्तुतवान्सद्यः सत्रिसृति
नसंशयः॥ तस्य गेहे सदा वामे धेनुः कल्पलतास्तथा॥ चिंतामणि
श्च सततं तिष्ठेव न संशयः॥ तत्समीपे स्थिराश्रीश्च सदा नातिसमुरा
न वेत्॥ महानयमवाप्नोति सदा स्वेच्छमात्रतः॥ १०॥ कुजकापस्य या १५
स्तुता चरस्येव जगत्त्रये॥ महास्तवमेवेनित्यं परमात्मा भवेदसौ॥
मुच्यते महद एवासौ बंधनेभ्यः खलीदभिः॥ तं पूजयंति सततं हरिरुद्रा
दयोपि च॥ स्तुभमेव लभेन्नित्यं सर्वापन्निर्विमुच्यते॥ देवगंधर्वय
क्षाद्यैः ब्रह्माद्यैरपि दुर्लभे भोगं प्राप्नोति सकलान्कामान् शीघ्रमेव न संशयः॥
न

दिव्यभोगयुतो विषयैः कन्या सहस्रसंयुतः॥ विमानानां ते समास्थाय दिव्याभर
णभूषितः॥ दिव्यचंदनलिप्तांगः सदा विंशति वार्षिकः॥ स कैलेसकला
न्लोकान् देवलोके नरसदा॥ तस्मादेतत्परं स्तोत्रं त्रिपुराहृदयं रसं॥
जपेद्यः सततं भक्त्या भवेत्साक्षात्सदाशिवः॥ २१७॥ ॥श्री॥ ॥इति श्रीरु
द्रयामले तिसंहितायां ईश्वरपार्वतीसंवादे त्रिपुराहृदयं नाम षउत्री
तिमः पटलः॥ ॥श्री॥ ॥देव्युवाच॥ ॥श्रीमत्त्रिपुरसुंदर्या याया विद्या
स्त्वयोदिता॥ कृपया कथिताः सर्वाः श्रुता अधिगता मया॥ प्राणना
थाधुना ब्रूहि कवचं मंत्रविग्रहं त्रैलोक्यमोहनं यत्ति नामतः कथि
तं पुरा॥ इदानीं श्रो तुमिछामि सर्वार्थं कवचं स्फुटं॥ ॥ईश्वर उवाच॥

शृणु देवी प्रवक्ष्यामि सुंदरी प्राणवल्लभे ॥ त्रैलोक्यमोहनं नाम सर्वा
विघ्नौघविग्रहं ॥ यद्धृत्वा दानवान्विष्णुर्निजघान मधुकैटभौ ॥ सृष्टिं वि
१६ तनुते ब्रह्मा यद्धृत्वा पठनाच्च यत् ॥ संहर्ता हि यतो देवो रुद्रो वास
वायतः ॥ धनाधिपः कुबेरोपि यतः सर्वे दिगीश्वराः ॥ नदेयं परशि
ष्येभ्यो देयं शिष्येभ्य एव च ॥ अभक्तेभ्योपि पुत्रेभ्यो दत्वा मृत्युम
वाप्नुयात् ॥ श्रीमत्त्रिपुरसुंदर्याः कवचस्य ऋषिः शिवः ॥ छंदो विराट् १६
देवता च श्रीमत्त्रिपुरसुंदरी ॥ धर्मार्थकाममोक्षेषु विनियोगः प्रकी
र्तितः ॥ ८ ॥ शिरो मे वाग्भवं पातु ॥ कएईलह्रीं ह्रूपकं ॥ हसकहलह्रीं
ललाटं पातु कामेश्वरी मम ॥ हसकलह्रीं दृशौ पातु कामेशस्य च मध्यमं ॥

कहयलह्रीं श्रुती पातु मम सौभाग्यदायकं ॥ हकलसह्रीं शक्त्याख्यं पा
तु जिह्वांपं च मे ॥ कएईलह्रीं हसकलह्रीं हकहलह्रीं क ॥ हयलह्रीं
हकलसह्रीं परमात्मास्वरूपिणी ॥ वदनं सकलं पातु पंचकूटस्वरूपं
च मे ॥ कएईलह्रीं च घ्राणं पातु वाग्भवसंज्ञकं ॥ हसकहलह्रीं
कंठं पातु कामेशसंज्ञकं ॥ सकलह्रीं शक्तिकूटं स्कंधौ पातु सदा मम ॥
कएईलह्रीं हसकहलह्रीं सकलह्रीं च ॥ कामेनो पाति ताविद्या वृक्ष
स्तौ सदावतु ॥ क्लीं ह्रीं श्रीं ऐं सौः ॐ ह्रीं श्रीं ऐं क्लीं सौः श्रीं ह्रीं क्लीं ऐं ह्रीं ॥
कामादि षोडशी पातु मडौ त्रिपुरसुंदरी ॥ ॐ क्लीं ह्रीं श्रीं ऐं क्लीं सौः श्रीं
ह्रीं क्लीं स्त्रीं ऐं क्रों क्रीं श्रीं हुं ॥ तारादि षोडशी पातु मणिबंधद्वयं मम ॥
श्रीं ह्रीं क्लीं ऐं सौः ॐ ह्रीं श्रीं ऐं क्लीं सौः सौः ऐं क्लीं ह्रीं श्रीं ॥ रमादि षोडशी

ऐतेषां नरव वएे तु

पातु करौ त्रिपुरसुन्दरी ॥ ह्रीं सौः ॐ ऐं ह्रीं श्रीं ऐं क्लीं सौः ह्सौं क्रों ऐं ह्रीं हुं श्रीं ॥
१७ मायादि बाउरी ख्याता हृदयं परिरक्षतु ॥ ऐं ह्रीं श्रीं क्लीं सौः ऐं क्लीं सौः ऐं १७
क्लीं सौः ऐं ह्रीं श्रीं क्लीं सौः ॥ वाग्गादि षाउरी पातु स्तनौ मे सुन्दरी परा ॥
कए श्रीं कएईल ह्रीं क्लीं हसकहल ह्रीं सौः ॥ सकलह्रीं महादेवी पार्श्वे
पातु पराजिता ॥ अपराजिताख्या विद्यायां पार्श्वे पातु पराजिता ॥
ह्रीं ह्स्रौं स्त्रौं ह्रीं स्त्रौं ह्स्रौं क्लीं हसकहल ह्रीं ह्रीं ह्रीं सौः सौः हहसकह
ल ह्रीं क्लीं ह्स्रौं स्त्रौं ह्रीं स्त्रौं ह्स्रौं ह्रीं च ॥ एषा त्रिरोदलो रूप महापु
रुषपूजिता ॥ महागुप्त स्वरूपा च केवलानन्दचिन्मयी ॥ कटि
देशं सदा पातु परब्रह्मस्वरूपिणी ॥ हसकहलह्रीं पृष्ठं सकल
ह्रीं सदा मम ॥ कुक्षिं पातु कामराजः सकलह्रीं सदावतु ॥

सकएईलह्रीं

हसकलह्रीं हसकहलह्रीं सकलह्रीं मे ॥ वक्षःस्थलं शान्तिकूटं सर्वसं
पत्तिदायकं ॥ लोपामुद्रापुंच द्वरी मध्यदेशं सदावतु ॥२८॥ कहएई
लह्रीं पातु नाभिं हकएईलह्रीं ॥ कटिं पातु सक्थिनी च सकएईल
८ ह्रीं सदा ॥ कहएईलह्रीं हकएईलह्रीं त्रिपुरसुन्दरी ॥ वरू चंद्रार्णमन्त्रना ८
मानवी सर्वतोवतु ॥ सहकपईलह्रीं चक्र कूर्गं सदा मम ॥ सहकह
एईलह्रीं गुह्यं पातु सदा मम ॥ हसकएईलह्रीं तु जानुनी पातु मे सदा ॥
सहकएईलह्रीं सहकहएईलह्रीं ॥३०॥ सकएईलह्रीं चंद्रविद्याप
क्षाक्षिवर्णा ॥ जंघे वा भयसे पातु सदा मां परिरक्षतु ॥ हस
कएईलह्रीं मे कुल्फयुग्मं सदावतु ॥ हसकएईलह्रीं मे पादौ पातु सर्वा
वतु ॥ सहकएईलह्रीं मे प्रपदौ पातु सर्वदा ॥ हसकएईलह्रीं हसकह

पातु

एईलह्रीं सौंः कएईलह्रं सदा कुबेरेण प्रपूजिता ॥ द्वाविंशाक्षरीवि
१८ यासर्वांगंमे सदावतु ॥ कएईलह्रीं प्राच्यांतु त्रिपुरा परिरक्षतु ॥ हस
कहलह्रीं पातु वह्निकोणे निरंतरं ॥ सहसकलह्रीं याम्यां पातुमे स
र्वसिद्धिदा ॥ कएईलह्रीं हसकहलह्रीं सहसकलह्रीं ॥ विद्या आग
स्त्येसंख्याच चक्रस्थां मां सदावतु ॥ सएईलह्रीं निरृंच नैऋत्यां
मां सदावतु ॥ सहकहलह्रीं पातु प्रतीच्यां तु द्वितीयकं ॥ सकलह्रीं तु
वायव्ये सदा मां परिरक्षतु ॥ सएईलह्रीं सहकहलह्रीं सकलह्रीं मे ॥ १८
नेघारात्मितविद्येयं सर्वांगंमे सदावतु ॥ हसकलह्रीं मुत्तरे त्रिपुरे पा
तु सर्वदा ॥ हसैकलह्रीं मीशान्ये सुंदरी पातु मां सदा ॥ ४० ॥ हसकलह्रीं
सहकलह्रीं [illegible] कहलह्रीं च ॥ ऊर्ध्वे रक्षतु मां नित्यं सदा भूत्यामहोदयः ॥
हसकहलह्रीं त्रिपुरा पाताले मां सदावतु ॥

ह

कएईलह्रीं हसकहलह्रीं सकलह्रीं च ॥ सर्वांगशाकूराज्ञैर्वै सततंप
रिरक्षतु ॥ कएईलह्रीं हसकहलह्रीं सकलह्रीं तु ॥ ब्रह्माणी मां सदा पातु श्री
मत्रिपुरसुंदरी ॥ हसकहलह्रीं हसकहलह्रीं सकलह्रीं हसकल हसक
[illegible] लसकलह्रीं श्रीं करी ॥ चतुःकूटा महाविद्या पाताले मां सदावतु ॥ ह
सकलह्रीं माधारं हसकहलह्रीं शिवं ॥ सकलह्रीं पातु नाभिं सकलह्रीं
मनाहतं ॥ सहकहलह्रीं कंठे सहसकलह्रीं तथा ॥ मनोभवं सदा पा
तु रससंख्या महाप्रभं ॥ षट्कूटवै श्वबीसा वै पातु मां सुंदरी परा ॥ सह
कहलह्रीं सहसकलह्रीं सहसकलह्रीं ॥ कएईलह्रीं हसकहलह्रीं सकलह्रीं ॥
द्वावीसासा प्रपद्यादिधि ॥ विद्या सदावतु ॥ कहएईलह्रीं हलएईल
ह्रीं सकएईलह्रीं ॥ कोधने रजिनानि त्या विदिक्षु दिक्षु रक्षतु ॥ हसक

ल ह्रीं ह स क ह ह ल ह्रीं स क ल ह्रीं ॥ महाज्ञानमयी पातु नित्यं मां षोडशी परा ॥
१९ श्रीं ह्रीं क्लीं ऐं सौः ॐ ह्रीं श्रीं क ए ई ल ह्रीं ह स क ह ल ह्रीं स क ल ह्रीं सौः ऐं क्लीं ह्रीं
श्रीं सदावतु ॥ सर्वांगं मे महाविद्याबीजरूपा च षोडशी ॥ ५२ ॥ ॐ क्लीं ह्रीं
श्रीं ऐं सौः क ए ई ल ह्रीं ह स क ह ल ह्रीं स क ल ह्रीं स्लौं ऐं क्रौं क्लीं ईं ह्रूं च
न था पुनः ॥ ५३ ॥ श्री बीज षोडशी पातु प्रथिता भुवनत्रये ॥ ज्ञा
ने नम्रस्य महसा मां शिरस्था सर्वतोऽवतु ॥ श्रीमहाषोडशी पूर्णो
या देव्या च प्रपूजिता ॥ यस्य विज्ञानमात्रेण मृत्यो मेरुस्थेय १९
भवेत् ॥ ऐं क ए ई ल ह्रीं क्लीं ह स क ह ल ह्रीं सौः स क ल ह्रीं सौः ह्सौः
ह्सः ह्रीं स क ल ह्रीं सौः ह स क ह ल ह्रीं क्लीं क ए ई ल ह्रीं ऐं ब्रह्मस्व
रूपिणी ॥ नेत्रे वदने बीते कर्णौ नासा सर्वतोऽवतु ॥ ५७ ॥ ब्रह्मस्व

रूपिणी चयं परमानन्दस्थिरतुना ॥ [illegible] अष्टदशा[illegible]री विद्या स
दा मां परिरक्षतु ॥ ५८ ॥ ॥ इति ते कथितं देवी ब्रह्मविद्याकुले
वरं ॥ त्रैलोक्यमोहनं नाम कवचं ब्रह्मरूपकं ॥ सप्तलक्षं महा
विद्या तंत्रादौ कथिता प्रिये ॥ तासां सारं रहस्यं सारतरं या या विद्या
स्त्रगोपिताः ॥ बहुनात्र किमुक्तेन श्रीमहाषोडशी परा ॥ प्रकाशि
ता मया देवी या पृष्टासि पुनः पुनः ॥ महाविद्यामयं दिव्यं क
वचं मन्मुखोदितं ॥ गुरुमभ्यर्च्य विधिवत् कवचं प्रपठेन्न
रः ॥ त्रिः सकृद् यथाज्ञानं सोऽपि पुण्यवतां नरः ॥ देशिकः
सर्वविद्यासु अधिकारी जपादिषु ॥ देवीमभ्यर्च्य विधिवत्

पुरश्चर्यांसमाचरे॥अष्टोत्तरशतंजप्त्वा दशांशंहवनादिकं॥
२० नतस्तुसिद्धिकवचःपुण्यामदनोपमः॥मंत्रसिद्धिर्भवेत्त
स्यपुरश्चर्यांविनाततः॥गद्यपद्यमयीवाणीतस्यवक्त्रे
प्रजायते॥वक्त्रेतस्यवसेन्नूनंकमलानिश्चयागृहे॥पुष्पां
जल्याष्टकंकृत्वामूलेनैवपठेत्सकृत्॥अपिवर्षसहस्रा
णांपूजाफलमवाप्नुयात्॥आत्मानंतन्मयंकृत्वायःपठ २०
त्कवचंपरं॥यंयंपश्यतिवैशीघ्रंससदासोभवेद्ध्रुवं॥
विलिख्यभूर्जेघुटिकांस्वर्णस्थांहृदिधारयेत्॥कंठेवा

दक्षिणेबाहौसकुर्याद्दासवज्जगत्॥त्रैलोक्यमोह
नस्यास्यत्रैलोक्यविजयंभवेत्॥तत्स्तोत्रंप्राप्यशस्त्राणि
ब्रह्मास्त्रादीनिपार्वती॥माल्यानिकुसुमानीववरदा
निभवंतिहि॥स्पर्धांनिरस्यसंभवेलक्ष्मीवाणीवसेत्त
तः॥इदंकवचमज्ञात्वायोजपेत्सुंदरीपरां॥नवलक्षं
जपित्वापितस्यविद्यानसिध्यति॥शस्त्रघातमवा
प्नोतिसोचिरान्मृत्युमाप्नुयात्॥इदमेवपरंयस्मात्
भुक्तिमुक्तिप्रदायकं॥तस्मात्सर्वप्रयत्नेनपठनीयं

मनु
क्षं क्षक्षभिः॥ गुरोरनुज्ञां लब्ध्वा तु कवचं प्रपठेत्सुधीः॥
२१ ७५॥ सर्वेश्वमगात्रितैश्चैवृतषोडशानागैराकारादियुग्म
रवस्वनलकोणगबिंदुमध्ये॥ सिंहासनोपरिगता
वरपीठमध्ये प्रोत्फुल्लपद्मकमलनिलयां त्रिपुरां भजे
हे॥७६॥ ॥श्री॥ ॥इति श्रीरुद्रयामले गौरीश्वरसंवा
दे श्रीत्रिपुरसुंदरी राजराजेश्वरी त्रैलोक्यमोहनकवचं २१
संपूर्णं॥ ॥श्री॥ ॥ॐ हसकलह्रीं ह्रीं ह्रीं सकलह्रीं क्लीं क्लीं
क्लीं श्रीं श्रीं श्रीं क्रीं क्रीं क्रीं रुद्रस्य येण मूलविद्यारापंउ

कीलयकुलंकीलयस्वाहा॥ ॥श्री॥ ॥यदक्षरपदभ्रष्टं मात्राहीनं तु य
द्भवेत्॥ तत्सर्वं क्षम्यतां देवी त्रिपुरेशि नमोस्तु ते॥ यादृशं पुस्त
कं दृष्ट्वा तादृशं लिखितं मया यदि शुद्धमशुद्धं वा मम दोषो नाद
यते॥ ॥श्री॥ ॥संवत्सराब्दे १७०१ विकारीनामसंवत्सरे॥ अश्वीन
शुक्लपक्षे च षष्ठी भृगुसमिश्रितं॥ तद्दिने च समाप्तोयं इदं पुस्त
कलेखनं॥ ॥श्री॥ ॥भग्नपृष्ठिकटिग्रीवस्तब्धदृष्टिरधोमुखं॥
कष्टेन लिखितं ग्रंथं यत्नेन प्रतिपालयेत्॥ ॥श्री॥ ॥श्रीत्रिपुरा
र्पणमस्तु॥ ॥श्री॥ ॥छ॥ ॥श्री॥ ॥छ॥ ॥श्री॥ ॥छ॥ ॥
॥छ॥ ॥श्री॥ ॥छ॥ ॥श्री॥ ॥छ॥ ॥श्री॥ ॥छ॥ ॥श्री॥

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

इतिश्रीललिताहृदयं त्रैलोक्यमोहनकवचं संपूर्णं॥

Dr. BHAU DAJI MEMORIAL